# Shri Nimbarka Ashtottarashatanamavalih

# શ્રીનિમ્બાર્કાષ્ટોત્તરશતનામાવલિઃ

## Document Information

Text title : Nimbarka Ashtottarashata Namavalih

File name : nimbArkAShTottarashatanAmAvaliH.itx

Category : deities_misc, gurudev, nimbArkAchArya, aShTottarashatanAma

Location : doc_deities_misc

Author : sadAnandabhaTTa

Proofread by : Chandrasekhar Karumuri

Description/comments : See corresponding stotram

Acknowledge-Permission: Jagadguru Nimbarkacharyapitham, Shrinimbarkatirtha, Kishangadh, Ajmer, Rajasthan

Latest update : January 23, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 23, 2023

*sanskritdocuments.org*

# શ્રીનિમ્બાર્કાષ્ટોત્તરશતનામાવલિઃ

શ્રીસદાનન્દ ભટ્ટ પ્રણીતા -
નમસ્કૃત્ય પ્રવક્ષ્યામિ શ્રીમદાચાર્યસદ્ગુરુમ્ ।
તન્નામ્નામષ્ટોત્તરશતં કૃષ્ણભક્તિવિવર્દ્ધનમ્ ॥

અથ નામાવલિઃ ।
ॐ આનન્દાય નમઃ ।
ॐ પરમાનન્દાય નમઃ ।
ॐ સૂત્રભાષ્ય પ્રકાશકાય નમઃ ।
ॐ જીવોદ્ધારપ્રયત્નાત્મને નમઃ ।
ॐ સ્મૃતમાત્રાર્ત્તિનાશનાય નમઃ ।
ॐ શ્રીભાગવત-ગુમાર્થ-પ્રબોધન-પરાયણાય નમઃ ।
ॐ સાકારબ્રહ્મવાદિને નમઃ ।
ॐ વ્યાપકાય નમઃ ।
ॐ બ્રહ્મપારગાય નમઃ ।
ॐ માયાધ્વાન્ત નિરાકર્ત્રે નમઃ । ૧૦
ॐ વ્યર્થવાદ નિરાસકૃતે નમઃ ।
ॐ ભક્તિ પઙ્કજ માર્ત્તણ્ડાય નમઃ ।
ॐ નિમ્બવૃક્ષવિભાકરાય નમઃ ।
ॐ સર્વાચાર્યપ્રિયાય નમઃ ।
ॐ કૃષ્ણવલ્લવીપ્રિયમાનદાય નમઃ ।
ॐ લક્ષ્મીકાન્તાય નમઃ ।
ॐ દ્વિજશ્રેષ્ઠાય નમઃ ।
ॐ મહાકારુણિકાય નમઃ ।
ॐ પ્રભવે નમઃ ।
ॐ અનન્તદાનદક્ષાય નમઃ । ૨૦
ॐ મહાદેવચરિત્રવતે નમઃ ।

ૐ આગમાનુકૃતિ વ્યાજ મોહિતાસુરમાનુષાય નમઃ ।

ૐ આનન્દ પૂર્ણાબ્ધિદેહાય નમઃ ।

ૐ વૈષ્ણવાય નમઃ ।

ૐ સતાં હિતકૃતે નમઃ ।

ૐ વ્રજભોગાર્થ સદ્રૂપ ભક્તિકૃતે નમઃ ।

ૐ પરમેશ્વરાય નમઃ ।

ૐ સર્વવૈષ્ણવસમ્પન્નાય નમઃ ।

ૐ શ્રીવિષ્ણુજ્ઞાનદાય નમઃ ।

ૐ મુનયે નમઃ । ૩૦

ૐ સ્વાનન્દચિક્કણાય નમઃ ।

ૐ પદ્મદલાયતવિલોચનાય નમઃ ।

ૐ કૃપાપીયૂષ સંજુષ્ટ વેદ પદ્મ પ્રભાકરાય નમઃ ।

ૐ રોષદૃષ્ટ્યાસન્દગ્ધભક્તશત્રવે નમઃ ।

ૐ સ્વસેવિતાય નમઃ ।

ૐ સુખપૂર્ણાય નમઃ ।

ૐ સુખારાધ્યાય નમઃ ।

ૐ શીતલાંઘ્રિસરોરુહાય નમઃ ।

ૐ ભક્તપ્રતાપાય નમઃ ।

ૐ ભક્તાદયે નમઃ । ૪૦

ૐ ભક્તાકામ પ્રપૂરિતાય નમઃ ।

ૐ શ્રીભાગવત-તાત્પર્યસમુદ્ર-મથને ક્ષમાય નમઃ ।

ૐ વેદાન્તસારવાચે નમઃ ।

ૐ સિન્ધુતર્પિતાખિલસેવકાય નમઃ ।

ૐ સામીપ્યભક્ત દત્તશ્રીકૃષ્ણપ્રેમ્ણે નમઃ ।

ૐ અખિલેષ્ટદાય નમઃ ।

ૐ કૃષ્ણક્રીડારતાય નમઃ ।

ૐ નિત્યં દયયૈતત્કથાપ્રદાય નમઃ ।

ૐ કમલાધવ ભક્ત્યર્થ-સર્વનામોપદેશકાય નમઃ ।

ૐ કર્માચારોપદેષ્ટ્રે નમઃ । ૫૦

ૐ ભક્તિમાર્ગ પ્રવર્ત્તકાય નમઃ ।

ૐ વિશ્વેન્દ્રાય નમઃ ।

ૐ ધર્મકર્ત્રે નમઃ ।

ૐ ધર્મકાલાય નમઃ ।
ૐ દ્વિજેશ્વરાય નમઃ ।
ૐ સર્વાનન્દાય નમઃ ।
ૐ સર્વકામાય નમઃ ।
ૐ કાલભાનવે નમઃ ।
ૐ મુનીશ્વરાય નમઃ ।
ૐ ગોપિકાયશવિસ્તારવક્ત્રે નમઃ । ૬૦
ૐ તત્પરસાધનાય નમઃ ।
ૐ જીવાચારોપદેશાર્થભક્તિ-ગ્રન્થનિરૂપકાય નમઃ ।
ૐ શાન્તાય નમઃ ।
ૐ જિતારિષડ્વર્ગાય  નમઃ ।
ૐ યશોદાપ્રિયચેષ્ટિતાય નમઃ ।
ૐ સ્વશિષ્યાર્થ કૃતાભ્યાસાય નમઃ ।
ૐ સર્વવિદ્યાવિશારદાય નમઃ ।
ૐ હરિભક્તિસ્વભાવાય નમઃ ।
ૐ કૃપાસાગર યત્નવતે નમઃ ।
ૐ વ્રજે સંસ્થાપિતપ્રાણાય નમઃ । ૭૦
ૐ વ્રજપાલાય નમઃ ।
ૐ વ્રજાધિપાય નમઃ ।
ૐ દયાલવે નમઃ ।
ૐ ભેદભર્ત્રે નમઃ ।
ૐ ભેદવાદે સહાયવતે નમઃ ।
ૐ તમાલશ્યામલાઙ્ગાય નમઃ ।
ૐ સિંહગ્રીવાય નમઃ ।
ૐ મહાભુજાય નમઃ ।
ૐ ઉપાસનાદિકર્ત્રે નમઃ ।
ૐ મુગ્ધમોહવિનાશકાય નમઃ । ૮૦
ૐ વાજપેય-સોમયજ્ઞ-ચાતુર્માસ્યાનુભૂતિકૃતે નમઃ ।
ૐ બકારિપદસેવોપદેષ્ટ્રે નમઃ ।
ૐ શ્રી ગોપિકાપ્રિયાય નમઃ ।
ૐ સુલક્ષણનિકુઞ્જસ્થાય નમઃ ।
ૐ ગોપીશ-રસ-પૂરિતાય નમઃ ।

ૐ ભક્તગમ્યાય નમઃ ।

ૐ હિતપ્રિયાય નમઃ ।

ૐ વિસ્મૃતાન્યાય નમઃ ।

ૐ જનાર્દનાય નમઃ ।

ૐ જનાર્દનસ્થિતયે નમઃ । ૯૦

ૐ શુદ્ધલીલાકર્ત્રે નમઃ ।

ૐ ગતસ્મયાય નમઃ ।

ૐ ગોપીનાથપ્રિયાય નમઃ ।

ૐ ગોપ્યૈ નમઃ ।

ૐ જ્ઞાનદાત્રે નમઃ ।

ૐ વિમોહનાય નમઃ ।

ૐ રામેષુપ્રાણાક્ષરોક્ત્યા સદ્ય પતિત પાવનાય નમઃ ।

ૐ હરિભક્ત્યોક્ત સુહૃદાય નમઃ ।

ૐ સ્વદયામ્બુજ વિષ્ટરાય નમઃ ।

ૐ ગદિને નમઃ । ૧૦૦

ૐ પદ્મિને નમઃ ।

ૐ સુયજ્ઞજ્ઞાય નમઃ ।

ૐ દૈત્યશત્રુવિમુક્તિદાય નમઃ ।

ૐ લીલામૃતરસાસ્વાદકૃપા-જનશરીરભૃતે નમઃ ।

ૐ ગોવર્દ્ધનકૃતોત્સાહાય નમઃ ।

ૐ તલ્લીલાપ્રેમમન્દિરાય નમઃ ।

ૐ મોક્ષકર્ત્રે નમઃ ।

ૐ મોક્ષભોક્ત્રે નમઃ ।

ૐ ચતુર્વેદ વિશારદાય નમઃ ।

ૐ સત્યસ્વભાવાય નમઃ । ૧૧૦

ૐ ત્રિગુણાતીતાય નમઃ ।

ૐ સુનયકોવિદાય નમઃ ।

ૐ સ્વકીર્ત્તિગીતાભાષ્યેન્દવે નમઃ ।

ૐ વેદભાષ્ય પ્રદર્શકાય નમઃ ।

ૐ માયાવાદાખ્યતૂલાગ્નયે નમઃ ।

ૐ કૃષ્ણવાક્યનિરૂપકાય નમઃ ।

ૐ અનન્ત-ભક્ત-સંરાધ્ય-ચરણામ્બુજ કોશભુવે નમઃ । ૧૧૭

અનેન નમન-સમર્પણ-કર્મણા ભગવન્ શ્રીનિમ્બાર્કાચાર્યઃ પ્રીયતામ્ ।

શ્રદ્ધાવિદોષબુદ્ધિર્યો જપત્યનુદિનં બુધમ્ ।
ચરણૈકમનાઃ શુદ્ધમુક્તિં પ્રાપ્નોત્યસંશયઃ ॥

યો જપેત્પ્રાતરુત્થાય નિમ્બાર્કસ્ય મહાત્મનઃ ।
શ્રદ્ધયા પૂરિતઃ પ્રોક્તં ભક્તિવિઘ્નવિનાશનમ્ ॥

પ્રેમભક્તિર્ભવેત્તસ્ય કેશવે નાત્ર સંશયઃ ।
અપારકષ્ટયુક્તોઽપિ મુચ્યતે કષ્ટસકટાત્ ॥

સદાનન્દેન ભટ્ટેન વિષ્ણુ-ભક્તિ-યશોઽર્થિના ।
પ્રિયાવલ્લભદાસેન કૃતં નિમ્બાર્ક-સંસ્તવમ્ ॥

સ્વાન્તાન્ધકારહન્તારં કર્ત્તારં શુભકર્મણામ્ ।
અભીષ્ટ-ફલદાતારં શ્રીનિમ્બાર્કમહં ભજે ॥

॥ ઇતિ શ્રીસદાનન્દભટ્ટપ્રણીતા શ્રીનિમ્બાર્કાષ્ટોત્તરશતનામાવલિઃ સમાપ્તા ॥

Proofread by Chandrasekhar Karumuri

*Shri Nimbarka Ashtottarashatanamavalih*

pdf was typeset on January 23, 2023

Please send corrections to *sanskrit@cheerful.com*